प्रत्यक्षानुमानरूपमेव अनुभवद्वयं स्वीचक्रुः अन्येषां सर्व्वेषामनयोरन्तर्भावात् । सांख्यादयः प्रत्यक्षानुमानशाब्दा एवेति भेदत्रयीमङ्गीचक्रुः । चार्वाकाः प्रत्यक्षमात्रमिति भेदः । "अनुभवं वचसा सखि लुम्पसीति" नैष० ।

**अनुभाव** पु० अनुभावयति उद्बोधयत्यनेन अनु+भू-णिच्-करणे-घञ् । कोषदण्डादिजाते राज्ञां तेजोविशेषे । सामर्थ्ये च । कर्त्तरि अच् । अलङ्कारशास्त्रप्रसिद्धे रसव्यञ्जके "भावं मनोगतं साक्षात् स्वगतं व्यञ्जयन्ति ये । तेऽनुभावा" इति ख्याताः, इत्युक्तलक्षणे भ्रूभङ्गादौ । "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथेति" सा०द० । अनुभावस्य लक्षणभेदादिकमुक्तं दर्पणे । "उद्बुद्धं कारणैः स्वैःस्वैर्ब्बहिर्भावं प्रकाशयन् । लोके यः कार्य्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥ यः खलु लोके सीतादिचन्द्रादिभिः स्वैःस्वैरालम्बनोद्दीपनकारणैरामादेरन्तरुद्बुद्धं रत्यादिकं वहिः प्रकाशयन् कार्य्यमित्युच्यते स काव्यनाट्ययोः पुनरनुभावः । कः पुनरसावित्याह । "उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः । तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि" ॥ तद्रूपा अनुभावस्वरूपाः । तत्र च यो यस्य रसस्यानुभावः स तत्स्वरूपवर्णने तत्र तत्र दर्शितः । तत्र सात्त्विकाः । "विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः" । सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनाऽऽन्तरो धर्म्मः । "सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः" ॥ गोबलीवर्द्दन्यायेन इति शेषः । के ते इत्याह । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ तत्र । स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः । वपुर्ज्जलोद्गमः स्वेदो रतिघर्म्मश्रमादिभिः ॥ हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया । मदसंमदपीडाद्यैर्वैस्वर्य्यं गद्गदं विदुः ॥ रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः । विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ॥ अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् । प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः इति" ॥ "अनुभावविशेषात्तु सेनापरिगतैरिव" रघुः । तेजसि च । गुरुभिरभिनिविष्टं लोकपालानुभावैरिति" रघुः । माहात्म्ये, "जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ इति" रघुः ।

**अनुभावक** त्रि० अनुभावयति बोधयति अनु-भू-णिच्-ण्वुल् । बोधके "यत्पदेन विना यस्याननुभावकता भवेत् आकाङ्क्षेति" भाषा० । "येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षेति" सिद्धान्तमुक्तावली ।

**अनुभाविन्** त्रि० अनुभवति अनु+भू-णिनि । साक्षात्कारादिकारके । "अनुभावी तु यः कश्चित् कुर्य्यात् साक्ष्यं विवादिनामिति" मनुः । मनु पश्चात् भवति । पश्चाज्जाते कनिष्ठादौ । "अनुभाविनां परिवापनमिति" आप०स्मृतिः । अनु पश्चाद्भवन्तीति अनुभाविनः कनिष्ठा इति रत्नाकरः "स्वाशौचमनुभवन्तीति अनुभवकारका" इति शु०त०रघु० ।

**अनुभाषण** न० अनु सहितं भाषणम् । सहभाषणे ।

**अनुभू** स्त्री अनु+भू-क्विप् । अनुभवरूपे ज्ञानभेदे "अयमात्मा सर्व्वानुभूरिति" वृ०उप० । "सत्यं ज्ञानमनन्तं ब्रह्मेति" श्रुत्या ब्रह्मणो ज्ञानरूपत्वात् सर्व्वज्ञानरूपत्वम् ।

**अनुभूत** त्रि० अनु+भू-कर्म्मणि क्त । अनुभवविषयीभूते पदार्थे अनु+भू-कर्त्तरि क्त । पश्चाज्जाते त्रि० ।

**अनुभूति** स्त्री अनु+भू-क्तिन् । अनुभवे तद्विवरणमनुभवशब्दे दृश्यम् । "अनुभूतिश्चतुर्विधा प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दजे" इति भाषा० ।

**अनुभूतिप्रकाश** पु० अनुभूतेरनुभवस्य वेदान्तश्रवणजन्यस्य प्रकाशार्थं माधवाचार्य्यप्रणीते उपनिषत्तात्पर्य्यज्ञापके प्रकरणभेदे

**अनुमत** त्रि० अनु+मन-क्त । स्वयंप्रवृत्ते इदं क्रियतामिति प्रोत्साहनार्थमनुज्ञाते । अनुमोदिते च "कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकमिति" वेणी० । "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि" इति मनुः । "सम्यग्विनीयानुमतो गृहायेति" च रघुः । "उभयानुमतः साक्षीति" स्मृतिः ।

**अनुमति** स्त्री अनु+मन-क्तिन् । अनुज्ञायाम् । "अनुमत्या व्यपेयादिति" स्मृतिः । अनुमन्यते कलाहीनत्वेऽपि पूर्णिमाविहितयागादिकरणायानुज्ञायते ऽस्याम् अधिकरणे क्तिन् । कलाहीनचन्द्रवत्यां शुक्लचतुर्दशीयुतपूर्णिमातिथौ । अनुमतो राकेति देवपत्न्याविति नैरुक्ताः पौर्णमास्याविति याज्ञिका या पूर्व्वा पौर्णमासी सानुमतिर्योत्तरा सा राकेति विज्ञायते ॥ अनुमतिरनुमननात् । "अनुमतिराकासिनीवालीकुह्व्यश्चरव" इति का० १८,६,२१, कुह्वै "चैवानुमत्यै च प्रजापतय एव चेति" मनुः ।

**अनुमन्तृ** त्रि० अनु+मन-तृच् । स्वयमुदासीने कार्य्यादौ प्रवृत्तस्यान्यस्योत्साहवर्द्धनार्थमनुज्ञाकर्त्तरि । "अनुमन्ता विशसिता नियन्ता क्रयविक्रयीति" मनुः "उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वर" इति गीता । "अनुमन्ता अनुमोदयितैव सन्निधिमात्रेणानुग्राहक" इति श्रीधरः ।

**अनुमन्त्रण** पु० अनु मन्त्रोच्चारणात् पश्चात् मन्त्रणम् मन्त्रेण